जोष्यमाणः, जुजोषयिष्यमाणः, जुष्यमाणः, जुजोषिष्यमाणः-जुजुषिष्यमाणः, जोजुष्यमाणः ;

जोषः, जुजोषयिषः, जोषः, जुजोषिषः-जुजुषिषः, जोजुषः ;

जोषयितुम्, जुजोषयिषितुम्, जोषितुम्, जुजोषिषितुम्-जुजुषिषितुम्-जोजुषितुम् ;

जोषणा, जुजोषयिषा, जुष्टिः, जुजोषिषा-जुजुषिषा, जोजुषा ;

जोषणम्, जुजोषयिषणम्, जोषणम्, जुजोषिषणम्-जुजुषिषणम्, जोजुषणम् ;

जोषयित्वा, जुजोषयिषित्वा, जोषित्वा-जुषित्वा, जुजोषिषित्वा-जुजुषिषित्वा, जोजुषित्वा ;

सञ्जोष्य, सञ्जुजोषयिष्य, सञ्जुष्य, सञ्जुजोषिष्य-सञ्जुजुषिष्य, सञ्जोजुष्य ;

जोषम् २, जोषयित्वा २, } जुजोषयिषम् २, जुजोषयिषित्वा २, } जोषम् २, जोषित्वा २, जुषित्वा २, } जुजोषिषम् २, जुजोषिषित्वा २, } जुजुषिषिम् २, जुजुषिषित्वा २, } जोजुषम् २ ; जोजुषित्वा २. }

(614) **"जुषी प्रीतिसेवनयोः"** (VI-तुदादिः-1288. सक. सेट्. आत्म.)

'जोषयेज्जोषतीत्येते युजादेः परितर्कणे ॥
प्रीतिसेवनयोरिष्टं तुदादेर्जुषते पदम् ।' (श्लो. 180-181) इति देवः ।

जोषकः-षिका, जोषकः-षिका, जुजोषिषकः-जुजुषिषकः जोजुषकः-षिका ;
जोषिता-त्री, जोषयिता-त्री, जुजोषिषिता-जुजुषिषिता-त्री, जोजुषिता-त्री ;
इत्यादीनि सर्वाण्यपि रूपाणि शुद्धधातौ ण्यन्त-सन्नन्त-यङन्तेषु च, अव्यवहितपूर्वलिखितजुषधातुवत् (613) बोध्यानि । अस्य ईदित्त्वात् 'श्वीदितो निष्ठायाम्' (7-2-14) इति इण्णिषेधे जुष्टम्-ष्टः-जुष्टवान्, इति रूपाणि भवन्ति। अस्य आत्मनेपदित्वात् शानचि —जुषमाणः-जोषिष्यमाणः, सन्नन्तात्-जुजोषिषमाणः-जुजुषिषमाणः, जुजोषिषिष्यमाणः-जुजुषिषिष्यमाणः, इत्यादीनि रूपाणि